National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 141-143
© 2025 NJHSR
www.sanskritarticle.com

**सुस्मिता दासः**
शोधच्छात्रा, साहित्यविभागः,
राष्टीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः - ५१७५०७

**Correspondence:**
**सुस्मिता दासः**
शोधच्छात्रा, साहित्यविभागः,
राष्टीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः - ५१७५०७

# श्रीदेवयानीचरितमहाकाव्ये प्रतिफलितः सामाजिकचित्रः

**सुस्मिता दासः**

**उपोद्धातः**

संस्कृतसाहित्ये समाजशब्दो बहुलप्रचलितः। सम् इत्युपसर्गपूर्वकात् अञ्जूधातोः घञ्प्रत्ययेन निष्पन्नोऽयं समाजशब्द इति। तस्मिन् वर्धमानः मनुष्यः सामाजिकप्राणी इति कथ्यते। कश्चन मनुष्यः स्वस्य आचार-व्यवहार-अभिरुचि-कर्तव्य-वासस्थानानां याथाथ्यप्रयोगेणैव सामाजिकजीवरूपेण परिगण्यते। वयं सर्वेऽपि परिवारेण सह समाजे निवसामः। तत्र विद्यमानौ देवतास्वरूपौ अस्मत्पितरौ। कश्चन एधमानः शिशुः प्राथम्येन परिवारादेव समाजे निवासयोग्यां विविधशिक्षां गृह्णाति।

समाजशब्दस्य प्रयोगः श्रीमद्भागवते परिलक्षितः

**धर्मव्यतिक्रमोऽह्यस्य समाजस्य ध्रुवं भवेत्।**
**यत्राधर्म्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित्॥**[1]

**श्रीदेवयानीचरिते परिवारः –**

भारतीयसमाजे संयुक्तपरिवारः महत्त्वपूर्णभूमिकां पालयति। परिवारः समाजस्य लघुतमं रूपम्। सामाजिकविकासाय प्रथमं सोपानं परिवारेणैव निर्मीयते। वंशपरम्पराक्रमेण परिवारसदस्याः गार्हस्थ्याश्रमपालनेन जीवनं यापयन्ति। सर्वेऽपि अतिथिभावनया जीवनमतिवाहयन्ति। देवयानीचरित-महाकाव्येऽपि असुरगुरुणा शुक्राचार्येण शिष्यरूपिणे कचाय यथायोग्यसम्मानप्रदानमतिहृदाकर्षकं विद्यते। परिवारस्य धर्मप्राणाः सर्वेऽपि जनाः अतिथिभावनायां परिपूर्णाः। कुटुम्बभावनायाम् माता, पिता, भगिनी, भ्राता, पतिः, पत्नी, पुत्र, कन्या इत्यादयः सर्वेऽपि सदस्याः अतिस्नेहेन एकत्र निवसन्ति। परिवारसदसानां सुव्यवहारः, स्नेहः, प्रीतिः, समस्या, समुदायः, विद्यालयः, ज्ञातिः इत्यादयः सर्वेऽपि विषयाः समाजशास्त्रे प्रतिपाद्यमानाः। महाकविः जयमन्तमिश्रः देवयानीचरितमहाकाव्ये अतिरमणीयतया प्रादर्शयत् यत् रुष्टोऽतिथिः कथं प्रसन्नो भवति। प्रसङ्गो यथा – शुक्राचार्यः यदा शर्मिष्ठायाः निष्ठुरव्यवहारेण रुष्टः सन् पुत्र्या सह वृषपर्वणः गृहं त्यक्तुमुद्युक्तः, तदा अतिथिभक्तिपरायणः सुरगुरुः असुरगुरोः पादयोः पतित्वा यथोचितभावेन क्षमां सम्प्रार्थ्य क्रोधमुपशाम्य च देवयानीं तस्याः पितरं च पुनः गृहं प्रत्यानीतवान्। यथा –

**वृषपर्वा वृत्तं ज्ञात्वा प्रत्यनीकमिवास्ति मे।**
**गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि॥**[2]

**पितृपुत्रीसम्बन्धः –**

पितुः गौरवप्रतिपादकं वाक्यमिदम्। पितृ-मातृ-गुरुसेवायै वैदिकमन्त्रे सूचना विद्यते – मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव। इति।

मातृ-पितृ-गुरूणां कृते त्रयः लोकाः सन्ति, यथा त्रय आश्रमाः, त्रयो वेदाः त्रयः अग्नय इति। महाभारतेऽस्योल्लेखः प्राप्यते –

**मातृपित्रोर्गुरूणां च पूजा बहुमता मम।**
**इह युक्तोनरो लोकान् यशश्च ममहदश्नुते॥**

**यच्च तेऽभ्योऽनुजानीयुः कर्म तात सुपूजिताः।**
**धर्माधर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिरः॥**
**एत एव त्रयो लोकाः एत एवाश्रमास्त्रयः।**
**एत एव त्रयो वेदाः एत एव त्रयोऽग्नयः॥**

देवयानीचरितमहाकाव्ये शुक्राचार्यः देवयान्याः पिता, देवयानी तस्य शुभलक्षणसम्पन्ना कन्या। असुरगुरुः स्वकीयकन्यां बहु स्निह्यति प्रीणाति च। सा देवयानी स्वपितुः शिष्यं कचाख्यं अतीवप्रीणाति । एकदा आश्रमं प्रत्यागन्तुं कचस्य विलम्बो जातः, तदा देवयानी प्राणमुत्स्रष्टुमुद्युता। पुत्र्याः एतादृशीमवस्थां परिलक्ष्य स्नेहवशाच्च पिता सञ्जीवनीविद्यया कचं पुनर्जीवितवान्। किन्तु दैत्याः पुनः कचं निहत्य चूर्णीकृत्य च मदिरया शुक्राचार्यं पायितवन्तः। पुनश्च देवयानी कचं पुनर्जीवितुं प्रार्थितवती, तदा शुक्राचार्यः कन्यायै उक्तवान् यत् यदि सः कचाय जीवनं दास्यति चेत् सः स्वयमेव कालप्रियः स्यात्। तथापि देवयानीपिता स्वप्राणान् अविचार्य कन्यायाः प्रियतमं कचं पुनर्जीवितवान्।

एताभिः घटनाभिः ज्ञायते यत् असुरगुरुः शुक्राचार्यः कन्यां बहु प्रीणाति स्निह्यति च। तथैव कन्या देवयानी अपि स्वपित्रे यथेष्टं श्रद्दधाति। यतो हि यदा शुक्राचार्यः उक्तवान् यत् यदि सः कचाय प्राणान् दास्यति चेत् सः एव मृत्युमुखे पतितः स्यात्। एतच्छ्रवणमात्रमेव देवयानी पित्रे उक्तवती –

**द्वौ मां शोकावग्निकल्पौ दहेतां**
**कचस्य नाशस्तव चैवोपघातः।**
**कचस्य नाशे मम नास्ति शर्म**
**तवोपघाते जीवितुं नास्मि शक्ता॥**[3]

**पितापुत्रसम्बन्धः –**

आत्मा वै जायते पुत्रः – इत्यनेन वाक्येन ज्ञायते यत् पितुः अमरत्वप्राप्तेः प्रधानं सोपानं भवति पुत्रः। पुत्रजन्म इव सुखकरं नास्ति किमपि धरातलेऽस्मिन्। देवयानीचरितमहाकाव्येऽस्मिन् ययातेः पञ्च पुत्राः सन्ति। देवयान्याः गर्भजातौ यदुः तुर्वसुः च। शर्मिष्ठायाः औरसजाताः अनुः द्रुह्युः पुरुः चेति। एतेषु पञ्चसु पुत्रेषु केवलं पुरुरेव पितुः ययातेः उपदेशं पालितवान्। एवञ्च यथोचितभावेन स्वयौवनं पित्रे प्रदाय पितुः वार्धक्यं गृहीतवान्। पुरुः स्वयं धन्यं मन्यते यत् सः तादृशः सौभाग्यवान् पुत्रः यो हि पितुः ऋणं पूरयितुं योग्यः इति। पितृकारणादेव सर्वे मानवजीवनं लभन्ते। अत एव पिता अतीवश्रद्धाभाजनः। श्रीमद्भागवतेऽपि याथाथ्येअस्य उल्लेखो वर्तते –

**को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान्।**
**प्रतिकर्तुं क्षमो यस्य प्रसादाद् विन्दते परम्॥**
**उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यम्।**
**अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः॥**
**इति प्रमुदितः पुरुः प्रत्यगृह्णाज्जरां पितुः।**
**सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृपः॥**[4] **इति**

महाभारतेऽपि एतादृशोल्लेखः प्राप्यते यत् विना पुत्रं पिता कदाचिदपि ऋणमुक्तो भवितुं नार्हति इति।

**गुरुशिष्यसम्बन्धः –**

गुरुः ब्रह्मा, गुरुः विष्णुः, गुरुः भगवान् शंकरः। साक्षात्परब्रह्मरूपं गुरुं प्रणमामि। शास्त्रेषु गुरोः स्थानं भगवतोऽपि श्रेष्ठं मन्यते। कृत्याकृत्यविवेकं बोधयति गुरुः। अतः सः सर्वदैव पूजनीयः। गुरुः ज्ञानपूर्णोपदेशवचनैः शिष्यस्य तमोरूपाज्ञानं नाशयति। अतः शिष्येणापि गुरुवाक्यं सदा पालनीयम्। भारतीयज्ञानपरम्परायां विना गुरुं शास्त्राध्ययनं निरर्थकं स्यादिति श्रूयतेतराम्। तस्मादद्यावधि प्रतिवर्षं आषाढपूर्णिमायां गुरुपूर्णिमा अनुष्ठीयते। प्रसिद्धं यत् देवतानां शयनानन्तरं गुरुरेव नः रक्षकः। अत्र श्रीदेवयानीचरितमहाकाव्ये कचस्य गुरुः शुक्राचार्यः, सः दैत्यराजस्य वृषपर्वणोऽपि कुलगुरुः।अन्यत्र देवगुरुः बृहस्पतिः महेन्द्रस्याचार्यः। शुक्राचार्यः कचम् अतिस्निग्धवान्। महाकाव्यस्य तृतीयसर्गे अस्य प्रमाणं प्राप्यते –

**कचस्य मस्तमाघ्राय ददौ तस्मै शुभाशिषम्।**
**शिरः कराभ्यां संस्पृश्य परिचुम्ब्य कचं बुधम्॥**[5]

मृतसञ्जीवनीविद्यां समुपास्य कचः गुरोः कृपावशात् मृतजनान् पुनर्जीवयितुं समर्थः संजातः इति दृश्यते।

**मित्रता**

सांख्यकारिकायां दुःखत्रयमुल्लिखितम्। यथा – आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकं चेति। तत्र आध्यात्मिकं दुःखं द्विविधम् – शारीरिकं मानसिकं चेति। मानसिकदुःखप्रसङ्गे टीकाकारः वदति – यदा दुर्जनैः सह सङ्गतिः समाजे भवति, तदा मानसिकदुःखं जायते। पुनश्च यदा आत्मीय-स्वजन-मित्र-हितकारिणः दुरं गच्छन्ति, तदा दुःखमनुभूयते। सामाजिकसंस्थानस्य इदं महत्त्वपूर्णम् अङ्गम्।

श्रीदेवयानीचरितमहाकाव्येऽपि दृश्यते यत् – देवयानीशर्मिष्ठयोर्मध्ये मित्रतायाः अनन्यसम्बन्धो वर्तते। देवयानी स्वपित्रा सह दैत्यराजस्य वृषपर्वणः आश्रमे न्युवास। येन तयोर्मध्ये मैत्रीभावः वर्धितः। एकत्र स्नान-भोजनादिकार्याणि सर्वाण्यपि कुरुतः। परस्परं विहाय कदापि न स्थितवत्यौ। यथोक्तं कविना –

**शर्मिष्ठा देवयानी चैकप्राणे हि नित्यदा।**
**क्रीडन्त्यौ ते हि गायन्त्यौ भुञ्जाते हि सहैव च॥**
**स्नान्त्यौ नद्यां समे ते च वसतो हि सदा हृदा।**
**कुर्लिप्सो युग्मयोः पुत्र्यौ न चैवैकाकिनी क्वचित्॥**[6]

ते एकात्मानौ एकप्राणे च स्तः। केवलं शरीरं भिन्नं वर्तते। समाज मित्रतायाः निदर्शनं बहुत्र प्राप्यते। मित्रं सुपुरुषो भवति चेत् किमपि कठिनं कर्म अतिसारल्येन सम्पादयितुं शक्यते। मित्रता मानवजीवने अतिमहत्त्वपूर्णं स्थानमधिकृत्य वर्तते। न हि वर्तमानकाले, अपि तु रामायणमहाभारतादिषु मित्रतायाः अपूर्वं निदर्शनं परिलक्ष्यते। श्रीमद्भागवतेऽपि अस्य उद्धरणं दरीदृश्यते।

**अतिथिसेवा –**

अत सातत्यगमने इत्यस्माद्धातोः औणादिके इथिन्प्रत्यये कृते सति अतिथिः इति पदं निष्पद्यते। One who goes continuously – A Guest. ऋग्वेदे अग्निः अतिथिसदृश इति उक्तम्। यजुर्वेदे सामवेदे च अग्निः गृहाधीनातिथिरूपेण अङ्गीकृतः।

श्रीदेवयानीचरितमहाकाव्येऽपि अतिथिसेवा अतीवरमणीयतया वर्णिता। महाकाव्यस्य प्रारम्भे दृश्यते यत् बृहस्पतिपुत्रः कचः मृतसञ्जीवनीविद्यां प्राप्तुं शुक्राचार्यस्य आश्रमं गतवान्। विद्येयं केवलम् असुरगुर्वधीना एव। शिष्यः कचः सञ्जीवनीविद्यालाभाय असुरगुरोः समीपं बहुवर्षं यापितवान्। गुरुः शुक्राचार्योऽपि यथायथम् आतिथ्यं प्रदाय स्वाश्रमे ससम्मानं न्युषितुं सुव्यवस्थां परिकल्पितवान्। कचः निर्भयेण सर्वदा गुरोः सेवां कृत्वा । श्रीदेवयानीचरितमहाकाव्यस्य तृतीयसर्गे शुक्राचार्यः कचस्य कथम् आप्यायनं कृतवान्, तस्मिन् विषये मनोरमवर्णना महाकविना जयमन्तमिश्रेण कृता वर्तते –

**गुरुप्रेरणयाऽऽयातः स्वेच्छया चापि सत्कचः।**
**अमृतस्य परां विद्या प्राप्तुं शुक्रमुपागतः।।**
**प्रणिपत्य शुक्रं भक्त्या प्रबोध- विनयान्वितः।**
**शुक्रं प्रसादयामास दैत्यानां परमं गुरुम् ।।**
**कचस्य मस्तमाघ्राय ददौ तस्मै शुभाशिषम् ।**
**शिरः कराभ्यां संस्पृश्य परिचुम्ब्य कचं बुधम् ।**
**शुक्राचार्यं सन्निवेद्य स्वागमन-प्रयोजनम् ।**
**विद्याऽमृतं हि मे ब्रह्मन् देहि देव दयां कुरु ।।**
**आम् व्यहृत्य गुरुः शुक्रः स्वाश्रमे वासमाददे ।**
**अतिष्ठत्तत्र सद्विद्यो बृहस्पति-सूतः कचः॥**

**देवयान्याः पतिभक्तिः**

देवयानीचरितमहाकाव्ये वर्णितः महान् आदर्शवादी राजा ययातिः। तस्यैव धर्मपत्नी शुक्राचार्यकन्या देवयानी। विवाहात् प्राक् परं च देवयानी समभावेन ययाति प्रीणाति स्म। ययातिर्यदा कूपात् देवयानीं रक्षितवान्, तदा देवयानी स्वहृदयं ययातये निवेदितवती। यथोक्तम् –

**एष मे दक्षिणौ राजन् पाणिस्ताम्रनखाङ्गुलिः।**
**समुद्धर गृहीत्वा मां कुलीनस्त्वं हि मे मतः॥**

अतः परं तयोर्विवाहः संजातः। यथायथभावेन स्त्रीकर्तव्यं पालयति स्म देवयानी। यदा ययातिः पुत्रेभ्यः राज्यं सम्विभाज्य वानप्रस्थाश्रमं गन्तुमुद्युक्तः, तदा देवयानी अपि ययातेः परिपूरकरूपेण स्वामिना सह वनं गतवती। कदापि सा स्त्रीधर्मादविच्युताः न भवति।

**भ्रातृत्वभावः –**

रामायणकालादेव भ्रात्रे स्नेहः, सौहार्दभावः इत्यादिचिन्तनं जनमनसि विराजते स्म। रामलक्ष्मणयोर्मध्ये यः सम्बन्धः, सः सर्वजनविश्रुतः अतिमनोहरश्च। तथैव श्रीदेवयानीचरितमहाकाव्ये कचः स्वयं देवयान्याः भ्रातृरूपेण चिन्तितवान्। यतो हि सः शुक्राचार्यगर्भात्पुनः जीवनं लब्धवान्। अन्यरीत्या देवयानी गुरुपुत्री, तत्सम्बन्धमा-धारीकृत्य सा भगिनीसदृशा एव भवति। देवयानी यदा कचाय विवाहप्रस्तावं प्रकटितवती उक्तवती च – भो कच! त्वां विहाय अहं न जीविष्यामि, अहं त्वां प्रीणामि। आशु मे पाणिग्रहणं करोतु। किन्तु कचः तस्याः प्रेमनिवेदनं खण्डयित्वा उक्तवान् – भगिनीविवाहः शास्त्रविरुद्धः। तस्मादयं प्रस्तावः अनुचितः। देवयान्याः निवेदनास्वीकारेण सा अतीवक्रुद्धा संजाता। तेन कारणेन गुरुपुत्री कचाय अभिशापं प्रददौ यत् तेनाधीतविद्या विलुप्स्यते। कचोऽपि प्रत्यभिशशाप – केनापि ब्राह्मणेन सा परिणीता न भविता। ततः कचः स्वगृहं गतवान।महाकाव्यस्य चतुर्थसर्गे प्रसङ्गोऽयमुद्धृतः –

**जगाद तां पुण्यतमो महात्मा ।।**
**त्वं मे गुरोः पुत्रि शुभेऽसि भगिनी**
**कथं त्वयेदृक् प्रभवेत् स्वबन्धः ।**
**भ्रात्रा समं नैव भवेद् भगिन्या**
**विवाहसम्बन्ध-विरुद्धधर्मकः ।।**[7]

**सहायकग्रन्थसूची-**


1.Dr.Mishra Jaymant**, "श्रीदेवयानीचरित-महाकाव्यम्"** Indira Prakashan , Bihar, 84600 (2010)

2. Dr.Mishra Kumari Abhilasha **"देवयानीचरित-महाकाव्यम् "**Kala Prakashan, Baranasi , 221005 (2020)

3. पण्डित रामनारायणदत्त शास्त्री पाण्डेय(अनुवादक) **"महाभारत"** गीताप्रेस, गोरखपुर, २७३००५

4. Dr.Mishra Jaymant, **"श्रीकृष्णचन्द्रचरित-महाकाव्यम्"** Indira Prakashan, Bihar, 846004 (2008)

5. रमेशचन्द्र खरे, **"श्रीमद्भगवद्गीता"** चौखम्भा प्रकाशन, वाराणसी-२२१००१


**पाद टिप्पणी : -**

[1] श्री.म.भा. १०।४४।९
[2] श्री.दे.च-६।२६
[3] म.भा.आ.प-६३।५७
[4] श्रीम.भा.न.स्क. १८।४३-४५
[5] श्री.दे.च-३।४
[6] श्री.दे.च-५।५-६
[7] श्री.दे.च-४।८